श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीबृहन्नारदीये पुराणे

# ॥ श्री वामनस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वामनस्तोत्रम् ॥

कश्यप उवाच

नमो नमस्तेऽखिलकारणाय
नमो नमस्तेऽखिलपालकाय।
नमो नमस्तेऽखिलनायकाय
नमो नमो दैत्यविनाशनाय॥ 1 ॥

नमो नमो भक्तजनप्रियाय
नमो नमः सज्जनरञ्जिताय।
नमो नमो दुर्जननाशकाय
नमोऽस्तु तस्मै जगदीश्वराय॥ 2 ॥

नमो नमः कारणवामनाय
नारायणायामितविक्रमाय।
श्रीशार्ङ्गचक्रासिगदाधराय
नमोऽस्तु तस्मै पुरुषोत्तमाय॥ 3 ॥

नमः पयोराशिनिवासनाय
नमोऽस्तु ते हृत्कमलासनाय।
नमोऽस्तु सूर्यंशुनिभप्रभाय
नमो नमः पुण्यकथागताय॥ 4 ॥

नमो नमोऽर्केन्दुविलोचनाय
नमोऽस्तु ते यज्ञफलप्रदाय।

नमोऽस्तु यज्ञाङ्गविराजिताय
नमोऽस्तु ते सज्जनवल्लभाय॥ 5॥

नमो नमः कारणकारणाय
नमोऽस्तु शब्दादिविवर्जिताय।
नमोऽस्तु ते दिव्य सुखप्रदाय
नमो नमो भक्तमनोगताय॥ 6॥

नमोऽस्तु तस्मै भ्रमनाशनाय
नमोऽस्तु ते मन्दरधारणाय।
नमोऽस्तु ते यज्ञवराहनाम्ने
नमो हिरण्याख्यविदारणाय॥ 7॥

नमोऽस्तु ते वामनरूपभाजे
नमोऽस्तु ते क्षत्रकुलान्तकाय।
नमोऽस्तु ते रावणमर्दकाय
नमोऽस्तु ते नन्दसुताग्रजाय॥ 8॥

नमस्ते कमलाकान्त नमस्ते सुखदायिने।
स्मृतार्त्तिनाशिने तुभ्यं भूयो भूयो नमो नमः॥ 9॥

य इदं वामनस्तोत्रं त्रिसन्ध्यं पठते नरः।
बलारोग्यार्थसन्तानैः तस्य नित्योत्सवो भवेत्॥ 10॥

॥ श्री वामनस्तोत्रं समाप्तम्॥